# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा - मार्च/एप्रिल - २०२०

| | | |
|---|---|---|
| कक्षा-आचार्य-२ | प्रश्नपत्रम् – २ | गुणाः – ७० |
| विषयः – वास्तुशास्त्रम् | सत्रम्- ४ (चतुर्थम्) | समयः- ११:३० तः ०२:३० |
| दिनाङ्कः – २७/०३/२०२० | सन्दर्भग्रन्थः – प्रासादमण्डनम्, बृहत्संहिता | |

---

### प्रथमान्वितिः (Unit 1)
गुणाः

**प्रश्नः १ अधोलिखितयोः कस्यचिदेकस्य व्याख्या कर्या।** ०५

१ चतुर्भागं समारभ्य यावत् सूर्योत्तरं शतम्।
भागसंख्येति विख्यातां फालनात्कर्णवाह्यतः।।

२ कर्णे प्रतिरथे भद्रे द्वे द्वे श्रृङ्गे प्रकारयेत्।
रथोपरथे तिलकं प्रत्यङ्गञ्च रथोपरि।।

**प्रश्नः २ कस्यचिदेकस्योपरि निबन्धं लिखत।** १०

१ माहेन्द्रप्रासादः

२ अधुना नागरप्रासादः

### द्वितीयान्वितिः (Unit 2)

**प्रश्नः ३ अधोलिखितयोः कस्यचिदेकस्य व्याख्या कार्या।** ०५

१ मुखमण्डपसङ्घाटो यदा भित्यन्तरे भवेत्।
न दोषः स्तम्भपट्टाद्यैः समं वा विषमं तलम्।।

२ मध्ये वितानं कर्तव्यं चित्रवर्णविराजितम्।।
नाटकादिकथारुपैर्नानाकारैर्विराजितम्।।

**प्रश्नः ४ अधोलिखितयोः कस्यचिदेकस्योपरि निबन्धं लिखत।** १०

१ वितानानिर्णयः

२ नृत्यमण्डपाः

### तृतीयान्वितिः (Unit 3)

**प्रश्नः ५ अधोलिखितयोः एकतरस्य व्याख्या कार्या।** ०५

१ पूर्वोत्तरदिशामूढं मूढं पश्चिम-दक्षिणे।
तत्रमूढममूढं वा यत्र तीर्थं समाहितम्।।

२ ब्रह्म-विष्णुशिवार्काणां भिन्नं दोषकरं नहि।
जन-गौरी-गणेशानां गृहं भिन्नं विवर्जयेत्।

**प्रश्नः ६ अधोलिखितयोरेकतरस्योपरि निबन्धं लिखत।** १०

१ छायाभेदाः

२ प्रतिष्ठादिवसविमर्शः

## चतुर्थान्वितिः (Unit 4)

**प्रश्नः ७ अधोलिखितयोः कस्यचिदेकस्य व्याख्या कार्या।** ०५

१ उत्तममष्टाभ्यधिकं हस्तशतं नृपगृहं पृथुत्वेन।
अष्टाष्टोनान्येवं पञ्च सपादानि दैर्घ्येण।।

२ विस्तारषोडशांशः सचतुर्हस्तो भवेद्गृहोच्छ्रायः।
द्वादशभागेनोनो भूमौ भूमौ समस्तानाम्।

**प्रश्नः ८** अधोलिखितयोः कस्यचिदेकस्योपरि निबन्धं लिखत। १०

१ गृहसमीपे शुभाऽशुभवृक्षाः

२ प्रशस्तभूमिलक्षणम्।

## पञ्चमान्वितिः (Unit 5)

**प्रश्नः ९ अधोलिखितेषु केषांचित् दशप्रश्नानामुत्तरं लिखत।** १०

१ नन्दनप्रासादे कति श्रृङ्गानि भवन्ति?

२ नन्दनप्रासादे कति भद्राणि भवन्ति?

३ प्रासादमण्डनम् इत्यस्य रचनाकारः कोऽस्ति?

४ बृहत्संहितायाः रचनाकारः कः?

५ केसर्यादि कति प्रासादः सान्ति?

६ केसरीप्रासादे कति श्रृंगानि भवन्ति?

७ केसर्यादिप्रासादेषु सर्वोत्तमः प्रासादः कः?

८ मेरुप्रासादे कति श्रृंगानि भवन्ति?

९ राज्ञः प्रथमगृहस्य दैर्घ्यविस्तारौ लिखत।

१० येषां प्रयोगः गृहनिर्माणे भवति। तेषु केषाञ्चित् पञ्चवृक्षाणां नामानि लिखतु।

११ देवगृहं गृहे कस्मिन् कोणे भवति।

१२ पाकगृहं कस्मिन् कोणे स्थापनीयम्।

१३ गृहे ब्रह्मस्थानं कुत्र भवति?

१४ घृतगन्धाभूमिः कस्य वर्णस्य कृते प्रशस्ता भवति?

१५ रक्तवर्णीयाभूमिः कस्य वर्णस्य कृते शुभा भवति?

*************************